1.साक्षात्संकेतितं योऽर्थमभिधत्ते स वाचकः ।

उत्सः - पूर्ववत्।

प्रसङ्गः - वाचकस्य स्वरूपविषये कारिका इयम् उल्लिखिता।

व्याख्या - स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते। स इति साक्षात् संकेतितः। अर्थात् वाच्यार्थस्य वोधकाः शब्दाः शब्दस्य प्रथमस्य प्राप्नुवन्ति तद् विषये आचार्यस्य इयं परिभाषा अस्ति।

साक्षात्संकेतितं योऽर्थमभिधत्ते स वाचकः ।

इहागृहीतसंकेतस्य शब्दस्यार्थप्रतीतेरभावात् संकेतसहाय एव शब्दोऽर्थविशेषं प्रतिपादयतीति यस्य यत्राव्यवधानेन संकेतो गृह्यते स तस्य वाचकः। अर्थात् वक्ता यत् किञ्चिदपि वदति तत् सर्वं प्रत्यक्षं न भवति। किञ्चिद् च परोक्षं परोक्षस्य ज्ञातुं तु सः शब्दानां माध्यमेन कारयति परन्तु प्रत्यक्षं प्रति तस्य संकेतः भवति। अतः यः शब्दः साक्षात् अर्थात् प्रत्यक्षरूपेण संकेतितं अर्थं वोधयति सः शब्दः वाचकः। वक्ता यत् वस्तूनां प्रत्यक्षं वर्णनं करोति तत् वस्तुप्रति तस्य संकेतोऽपि भवति। तेन संकेतेन च अर्थः स्पष्टेन प्रतीयते यथा कश्चित् वदति- इयं गौः अस्मिन् उदाहरणे गौ शब्दं प्रति वक्ता संकेतं करोति। संकेतद्वारा सः पशुः तस्या समक्षे आगच्छति यस्य ज्ञानं सः गोरूपेण करोति।

2.संकेतितश्चतुर्भेदो जात्यादिर्जातिरेव वा।

उत्सः - पूर्ववत्।

प्रसङ्गः - संकेतितार्थस्य भेदविषये कारिका इयम् उपस्थिता।

व्याख्या - वाचकशब्दानां सम्बन्धे आचार्येण इदं स्पष्टं कृतमासीत् यत् संकेतितस्य अर्थस्य वोधकाः शब्दाः वाचकाः भवन्ति। अत्र अस्यां कारिकायां आचार्यः इदं स्पष्टं करोति यत् संकेतः कुत्र क्रियते। अथवा कति वस्तु सम्पादयते तस्य सम्वन्धे स्वयं आचार्यः स्पष्टयति।

संकेतितश्चतुर्भेदो जात्यादिर्जातिरेव वा।

अर्थात् संकेतितस्य अर्थस्य चत्वार भेदाः भवन्ति। अथवा चतुर्षु पदार्थेषु अर्थस्य उपस्थितिः भवति। ते सन्ति- जातिः, गुणः, क्रिया, यदृच्छा च।

जातिः - संकेतस्य मध्ये सर्वप्रथमं हि जातिः। उक्तं हि वाक्यपदीये-

न हि गौः स्वरूपेण गौर्नाप्यगौः। गोत्वाभिसम्बन्धात्तु गौः । इति।

यथा, कश्चिद् वदति गां आनय -अनेन कथनेन श्रोता विविधेषु पशुषु गां तस्याः जातिद्वारा एव जानाति।

गुणः - द्वितीयः संकेतः हि गुणः। जात्याः पश्चात् किदृशी गौः अस्याः स्पष्टीकरणे शुक्लागौः कपिलागौः इत्यादि। महाभाष्यकारेण उक्तम्-

गौः शुक्लश्चलो डित्थ।

अत्र प्रथमः संकेतः गोत्व जातिं प्रति आसीत्, तत् पश्चात् च तस्य शुक्लत्वं प्रति कपिलत्वं प्रति संकेतः दृश्यते। अतः द्वितीयः संकेतः गुणं प्रति अस्ति।

क्रिया - क्रिया शब्देन वयं साध्यावस्था यथा पचति गच्छति इत्यादीनि रूपाणि पश्यामः। उक्तं च-

साध्यः पूर्वापरीभूतावयवः क्रियारूपः।

अर्थात् साध्यमेव क्रियारूपं कथ्यते। अतः सिद्धावस्था हि यं उत्पादयितव्यम्। यथा पाकः हि एकः साध्यव्यापारः तथा क्रियारूपः। अत्र पच् धातु घञ् प्रत्ययद्वारा पाक इति शब्दस्य निष्पत्तिः भवति।

यदृच्छा - डित्थादिशब्दानामन्त्यवुद्धिनिग्राह्यं संहृतक्रमं स्वरूपं वक्ता यदृच्छया डित्थादिष्वर्थेषूपाधित्वेन संनिवेश्यत इति सोऽयं संञ्ञारूपो यदृच्छात्मक इति। महाभाष्यकारेण उक्तम्-

गौः शुक्लश्चलो डित्थ इत्यादौ चतुष्टयी शब्दानां प्रवृत्तिः । इति

अर्थात् ते शब्दाः यदृच्छाः भवन्ति ये इच्छानुसारेण व्यक्तेः नामानुसारेण प्रयुक्ताः भवन्ति। यथा कश्चिद् स्वपशोः अथवा वालकस्य इच्छानुसारेण नामकरणं करोति।